# ॥ वाल्मीकि रामायण ॥

## २ अयोध्याकाण्ड

### अध्याय १३

ते तु तां रजनीमुष्य ब्राह्मणा वेदपारगाः ।
उपतस्थुरुपस्थानं सहराजपुरोहिताः ॥ १ ॥

अमात्या बलमुख्याश्च मुख्या ये निगमस्य च ।
राघवस्याभिषेकार्थे प्रीयमाणास्तु सङ्गताः ॥ २ ॥

उदिते विमले सूर्ये पुष्ये चाभ्यागतेऽहनि ।
अभिषेकाय रामस्य द्विजेन्द्रैरुपकल्पितम् ॥ ३ ॥

काञ्चना जलकुम्भाश्च भद्रपीठं स्वलङ्कृतम् ।
रामश्च सम्यगास्तीर्णो भास्वरा व्याघ्रचर्मणा ॥ ४ ॥

गङ्गायमुनयोः पुण्यात्सङ्गमादाहृतं जलम् ।
याश्चान्याः सरितः पुण्या ह्रदाः कूपाः सरांसि च ॥ ५ ॥

प्राग्वाहाश्चोर्ध्ववाहाश्च तिर्यग्वाहाः समाहिताः ।
ताभ्यश्चैवाहृतं तोयं समुद्रेभ्यश्च सर्वशः ॥ ६ ॥

क्षौद्रं दधिघृतं लाजा धर्भाः सुमनसः पयः ।
सलाजाः क्षीरिभिश्छन्ना घटाः काञ्चनराजताः ।
पद्मोत्पलयुता भान्ति पूर्णाः परमवारिणा ॥ ७ ॥

चन्द्रांशुविकचप्रख्यं पाण्डुरं रत्नभूषितम् ।
सज्जं तिष्ठति रामस्य वालव्यजनमुत्तमम् ॥ ८ ॥

चन्द्रमण्डलसङ्काशमातपत्रं च पाण्डुरम् ।
सज्जं द्युतिकरं श्रीमदभिषेकपुरस्कृतम् ॥ ९ ॥

पाण्डुरश्च वृषः सज्जः पाण्डुराश्वश्च सुस्थितः ।
प्रस्रुतश्च गजः श्रीमानौपवाह्यः प्रतीक्षते ॥ १० ॥

अष्टौ कन्याश्च मङ्गल्याः सर्वाभरणभूषिताः ।
वादित्राणि च सर्वाणि बन्दिनश्च तथापरे ॥ ११ ॥

इक्ष्वाकूणां यथा राज्ये सम्भ्रियेताभिषेचनम् ।
तथा जातीयामादाय राजपुत्राभिषेचनम् ॥ १२ ॥

ते राजवचनात्तत्र समवेता महीपतिम् ।
अपश्यन्तोऽब्रुवन्को नु राज्ञो नः प्रतिवेदयेत् ॥ १३ ॥

न पश्यामश्च राजानमुदितश्च दिवाकरः ।
यौवराज्याभिषेकश्च सज्जो रामस्य धीमतः ॥ १४ ॥

इति तेषु ब्रुवाणेषु सार्वभौमान्महीपतीन् ।
अब्रवीत्तानिदं सर्वान्सुमन्त्रो राजसत्कृतः ॥ १५ ॥

अयं पृच्छामि वचनात्सुखमायुष्मताम् अहम् ।
राज्ञः सम्प्रतिबुद्धस्य यच्चागमनकारणम् ॥ १६ ॥

इत्युक्त्वान्तःपुरद्वारमाजगाम पुराणवित् ।
आशीर्भिर्गुणयुक्ताभिरभितुष्टाव राघवम् ॥ १७ ॥

गता भगवती रात्रिरहः शिवमुपस्थितम् ।
बुध्यस्व नृपशार्दूल कुरु कार्यमनन्तरम् ॥ १८ ॥

ब्राह्मणा बलमुख्याश्च नैगमाश्चागता नृप ।
दर्शनं प्रतिकाङ्क्षन्ते प्रतिबुध्यस्व राघव ॥ १९ ॥

स्तुवन्तं तं तदा सूतं सुमन्त्रं मन्त्रकोविदम् ।
प्रतिबुध्य ततो राजा इदं वचनमब्रवीत् ॥ २० ॥

न चैव सम्प्रसुतोऽहमानयेदाशु राघवम् ।
इति राजा दशरथः सूतं तत्रान्वशात्पुनः ॥ २१ ॥

स राजवचनं श्रुत्वा शिरसा प्रतिपूज्य तम् ।
निर्जगाम नृपावासान्मन्यमानः प्रियं महत् ॥ २२ ॥

प्रपन्नो राजमार्गं च पताका ध्वजशोभितम् ।
स सूतस्तत्र शुश्राव रामाधिकरणाः कथाः ॥ २३ ॥

ततो ददर्श रुचिरं कैलाससदृशप्रभम् ।
रामवेश्म सुमन्त्रस्तु शक्रवेश्मसमप्रभम् ॥ २४ ॥

महाकपाटपिहितं वितर्दिशतशोभितम् ।
काञ्चनप्रतिमैकाग्रं मणिविद्रुमतोरणम् ॥ २५ ॥

शारदाभ्रघनप्रख्यं दीप्तं मेरुगुहोपमम् ।

दामभिर्वरमाल्यानां सुमहद्भिरलङ्कृतम् ॥ २६॥

स वाजियुक्तेन रथेन सारथिर्
नराकुलं राजकुलं विलोकयन् ।
ततः समासाद्य महाधनं महत्
प्रहृष्टरोमा स बभूव सारथिः ॥ २७॥

तदद्रिकूटाचलमेघसंनिभं
महाविमानोत्तमवेश्मसङ्घवत् ।
अवार्यमाणः प्रविवेश सारथिः
प्रभूतरत्नं मकरो यथार्णवम् ॥ २८॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com